No. १३५६

Title विधिवाद:

Author

Extent १९ Age x

Subject न्यायशास्त्रं

विधिवादः

१३५६

१८ पत्रे

१८

न्याय॥

उच्छिन्न प्रच्छिन्नवाद ५१०

विधिवाद

प्रमितिर्विभाव्यते। तथापि प्रकृते उपोद्घातसंगतिरुपपद्यते। जनकतासंबंधेन प्रवर्तकज्ञानस्य प्रवृत्तिप्रयोजकत्वव्याप्यतया प्रवृत्तिप्रयोजकत्व

॥श्रीमहागणाधिपतये नमः॥ श्रीअसितायै नमः॥ श्रीमहादेवपंडितेभ्यो नमः॥ कालकूटगलः क्रूरभुजंगवलयो प्रियः।
१ ननस्पर्शितमाश्रये विग्रहं नौमि शुभ्रं॥ १॥ उच्छिन्नप्रच्छिन्नवादेषु वेदे आचारमूलत्वं व्यवस्थापितं। तत्राचारपदस्य प्रवृत्त्यर्थ
कतया प्रवृत्तिजनकज्ञाने जनकत्वरूपप्रवृत्तिप्रयोजकत्वं। एवं प्रवर्तकज्ञानस्योच्छिन्नवादाभिहितनिरुक्ताचारमू प्रच्छिन्न
लत्वघटकतया तथाविधपूर्वग्रंथाभिहितनिरुक्तवेदनिष्ठाचारमूलत्वरूपप्रकृततदुपोद्घातरूपोपोद्घातसंगत्या वेदे क
आचारमूलत्वस्य व्यवस्थापनानंतरं प्रवर्तकज्ञानं निरूप्यते। उपपादितं चानुमाननिरुक्तिप्रकाशे प्रकृतघटकत्वस्या
प्युपोद्घातसंगतित्वमस्माभिरिति। पुरुषाचारमूलत्वनिरुक्तप्रयोजकत्वस्यापि तु स्वरूपसंबंधरूपप्रवृत्तिप्रयोजक
त्वरूपाचारमूलत्वव्यतिरेकप्रयुक्तव्यतिरेकप्रतियोगित्वरूपोपोद्घातस्य प्रवर्तकज्ञानस्य प्रवृत्तिप्रयोजकत्वव्याप्य
तया प्रवृत्तिप्रयोजकत्वरूपाचारमूलत्वव्यतिरेकप्रयुक्तव्यतिरेकप्रतियोगित्वरूपोपोद्घातस्य प्रवर्तकज्ञाने संभ
वात्। प्रकृतव्यतिरेकप्रयुक्तव्यतिरेकप्रतियोगित्वस्याप्युपोद्घातसंगतित्वेन तत्र तत्रोपपादितत्वादिति। तत्रा
भिधाज्ञानं प्रवर्तकमिति भाट्टाः। तेषामयमाशयः। प्रवृत्तिर्द्विविधा स्वेच्छाधीना पराधीना च। तत्र स्वेच्छाधीनप्रवृत्तिं राम
प्रति स्वेष्टसाधनताज्ञानं परप्रयोज्यप्रवृत्तिं प्रति परानिष्टप्रवर्तनाज्ञानं च हेतुत्वेन कल्प्यते। राजाज्ञादितः पितुराज्ञा १

षेदोषेपुनरारेः प्रवृत्तिरर्थिनानां राज्ञामाज्ञाप्रवर्त्तकत्वेमाकारकज्ञानस्यानुविधानात् प्रवर्त्तनात्वं वा प्रवृत्तिजनक
धि त्वमिति ग्निकेवेसम्भवेतनः प्रवर्त्तस्वर्गकामोयजेतेत्यादिविधेयोज्योपाणां शिष्यंचरप्रवृत्तेरपि विधिरूपपरप्रयोजनतयाविवि
धितिष्टवृत्तेर्नाज्ञानसाध्यत्वमनुरूपमर्गाकार्यमुन्तन्नतस्यैवकारणतेनकुसत्वाव तन्त्रविनाऽभिधायाः शाब्दनिष्ट
त्वलिङ थेतेनसंभवतीत्यभिधापालिङ्निष्टत्वंलिङर्थत्वंचावश्यकं अत्रविचारागविप्रतिपन्नयः स्वर्गकामोयजेतेत्या
दिविधिः यागप्रवृत्तिजनकज्ञानविषयव्यापारगन्त्वा विधिनिष्टोधर्मः यागप्रवृत्तिजनकज्ञानविषयोनवा प्रवर्त्तक
ज्ञानविषयोधर्मः विधिजन्यानवाइत्याकाराज्ञेयाः अत्रविधिकोविर्भट्टानांनिषेधकोपिनैयायिकानां मनुभट्टमतेऽभि का
धात्मकप्रवृत्तेनज्ञानस्यप्रवर्त्तकत्वेभावनाज्ञानस्यप्रवर्त्तकत्वमितिसिद्धान्तव्याघातइतिचेन्न भावनायाअर्थभावना
शाब्दभावनाभेदेनद्वैविध्यात् प्रकृतेशाब्दभावनाया एवाभिधानात् ननुभावनायाद्वैविध्येतयोर्भावनांशत्रयवतीति
सिद्धान्तव्याकोपः प्रकृतेत्रिविधत्वस्यांशत्रयरूपत्वादितिचेन्न भ्रान्तोसि नहित्रित्वेनत्रैविध्यंत्वमेवांशत्रयवत्त्वं पुनर्भाव
नायाद्वैविध्येऽन्यानुपपत्तिः स्यात् अपितुकर्मकरणाद्विकर्त्तव्यत्वेनेतित्रितयाकांक्षावशात्तथाविधत्रितयान्वितत्वंभाव
नाज्ञानान्तरं किंभाव्यंकेनभाव्यंकथंभाव्यमित्याकांक्षोदयात् अन्यथालिङः परजन्यार्थ भावनाज्ञानानन्तरं यागादिगो

इष्टानुदयप्रसंगादित्यर्थकरणात्तस्य तत्रैतद्यदधीनत्वादित्यस्य तथाविधोचितयथधर्मप्रकारकार्थभावनाविशेष्यकबो ३

नरार्थभावनाविशेष्यकस्वर्गफलककल्पयागादिकरणककल्पप्रयाजादीतिकर्त्तव्यताकत्वप्रकारकबोधस्यानुभवसिद्धत्वात्फला
पापत्तेः अत एव विधिवादे च स्वधरमिश्रा अप्याहुः अन्यथा स्वर्गादिफलं न भावयेत् तस्यैतत्त्रितयाधीनत्वादिति अत्र स्व
र्गादिफलं न भावयेदित्यस्य स्वर्गादिफलकत्वाद्यवच्छिन्नत्रितयधर्मप्रकारकार्थभावनाविशेष्यकबोधस्य तथाविधाकांक्षा
त्रयाधीनत्वादित्यर्थकरणत्वान्नासंगतिरिति ननु भट्टमते अभिधायाः शाब्दभावनात्वे तत्साधकाभावः स्वं अर्थभावनायाश्च
पि लिङ्पदवाच्यत्वे मानाभावात् न लिङ्पदात्तथाविधत्रितयाकांक्षासहकृतार्थभावनाविशेष्यकतथाविधधर्मत्रयप्रका
रकबोधस्यापि संभव इति कथमुपदर्शितरीत्या तन्मतसिद्धोपपादनमिति चेन्न तैरभिधायाः शाब्दभावनात्वाभ्युपगमेन
अर्थानुकूलव्यापाररूपायां अर्थभावनायां लिङ्पदत्वावच्छिन्ननिरूपितशक्त्यभावे पि आख्यातसामान्यनिरूपितशक्त्या
लिङ्पदानुपस्थितिसंभवेन चानुपपत्त्यभावात् तदाहुर्भट्टपादाः अभिधाभावनामाहुरन्यामेव लिङादयः अर्थात्मभावना
त्वन्या सर्वाख्यातगोचर इति अत्राभिधाभावनामित्यस्याभिधीयते अनेनेत्यभिधाशब्दस्तत्तल्लिष्टां भावनामित्यर्थो बोध्यः
अन्यां अर्थभावनातो भिन्नामाहुः स्वशक्त्या उपस्थापयन्ति अर्थात्मभावनेति अर्थोत्र धात्वर्थयागादिः अर्थतादात्म्यापन्ना राम
आत्मत्वं जनकत्वरूपविषयित्वं वृत्तित्वं वा एवं च यागादिविषयिणी भावना आत्मवृत्तिभावना वा अत्रार्थात्मशब्दार्थो बोध्यः २

भावना१

अन्या। अभिधारूपभावनातो भिन्ना। सर्वाख्यातस्य गोचरः सर्वाख्यातगामा। एवं भट्टमते शाब्दभावनापि कर्मैककरणेति कर्त्त
मेतत् लिङ् पानि नालिङाबोधते। भट्टमते शाब्दभावनाया लिङ्. पदवाच्यतया लिङ्. पदात् शाब्दभावनोपस्थितिः अनंतरं। अस्याः ४
किंभावयेत् किंकरणं केनेति कर्त्तव्यताख्याकांक्षा जिज्ञासारूपाकांक्षासंभवात्। कर्मैवास्य पाग्र्यादिप्रवृत्तिः करणांशो शाब्दभाव
नायां लिङ्. पदनिरूपितशक्तिज्ञानं वा पूर्वं संपिण्ड्य देवताद्युक्ता दिस्तुत्यर्थवादः सहकारीति कर्माद्युपरिचयानुपपत्तिः।
तथा च भट्टपादाः। लिङोभिधा सैव च शब्दभावना भाव्या च तस्याः पुरुषप्रवृत्तिः। संबंधबोधः करणं तदीयं प्ररोचना चांगतया
प्रयुज्यते इति। अत्र लिङोभिधेत्यस्य लिङ्वृत्तिरभिधेत्यर्थः अत्र वृत्तिलक्षणरूपसंबंधेन। तेः समवायानभ्युपगमात् शा
ब्दभावनेत्यस्य शाब्दभावनेत्यर्थः शाब्दीति शाब्दभावना शाब्दभावना इति सुतरां। भाव्यत्यस्य फलमित्यर्थः संबंध इत्यस्य
शाब्दशक्तिज्ञानमित्यर्थः तदीयमित्यस्य शाब्दभावनीयमित्यर्थः इतिकरणमित्यस्यान्वेति। प्ररोचनेत्यस्य वा पूर्वं संपिण्ड्य
देवताद्युक्तादिस्तुत्यर्थवादः इत्यर्थः। अंगतयेत्यस्य सहकारित्वेनेत्यर्थः। तद्यथा भट्टमते लिङर्थः स्वर्गकामो यजेतेत्यादौ
लिङ्पदेनाख्यातसामान्यशक्त्या अर्थभावनोपस्थाप्यते तदुक्तं तत्र कर्मैककरणेति कर्त्तव्यताकांक्षा उपदर्शितजिज्ञासा
रूपा जन्यते। तदा तत्सामर्थ्यात् नियमतः कल्पनात्। ततः स्वर्गकर्मिका यागकरणिका आग्रयाजादीति कर्त्तव्यताकास्वर्गे

विधि॰टि॰ ३ कामकर्तृकाभावनाख्याकारस्यार्थभावनाविशेष्यकबोधः अत्र यागकरणकत्वं न यागनिष्ठकरणतानिरूपकत्वं यागस्या
र्थभावनाजन्यत्वेन तत्रार्थभावनाकरणताभावात् अपि तु यागनिष्ठविषयतानिरूपकत्वं पारिभाषिकं ततः विषयत्वं
चात्र जन्यत्वमिति केचित् यागजन्यफलप्रयोजकत्वं प्रकृते यागकरणकत्वं तस्य च स्वर्गादिरूपफलस्य करणकत्वादिकं चात्र
3 यागादेः संबंधिविधया भासते न तु प्रकारविधया भासते तदुपस्थापकपदाभावात् तथाविधार्थस्य कल्पने गौरवात् न
चात्र प्रयाजादेः कथं सहकृतत्वरूपेतिकर्तव्यताकत्वसंबंधेन भानं तदुपस्थापकपदाभावादिति वाच्यं उपदर्शितसहका
र्याकांक्षायाः प्रकारांतरेणानिवृत्तेरन्यथानुपपत्त्या प्रयाजादिपदाध्याहारेणैव तथाविधबोधनिर्वाहात्। एवं च स्वर्गकाम
वैचित्र्यात् कामनाविशेषणत्वेनोपस्थितस्य स्वर्गस्यापि फलत्वसंबंधेनात्र यागे न यो बोधः एवं क्रमेण प्रथमाख्याता
र्थभावनाविशेष्यकावांतरबोधानंतरं लिङ्पदोपस्थापितशाब्दभावनायां किं भाव्यं केन कथं भाव्यमित्याकारकजि
ज्ञासारूपाकांक्षावशात् उपदर्शितशाब्दविशिष्टार्थभावनाविशेष्यकः स्वर्गस्य साध्यत्वसहकृतत्वज्ञानकरण
कशाब्दभावनात्वविशिष्टप्रवर्तनाविषयत्वविषयकमहावाक्यार्थबोध उत्पद्यते। विषयत्वं चात्र जन्यत्वं ततश्च फलाकां
क्षानिवृत्तेरिति। न चोपदर्शितमहावाक्यार्थबोधे मानाभाव इति वाच्यं विध्युपस्थापितभावनालिङः श्रेय इति भट्टसिद्धांतात् राम ३

नादृशसिद्धान्तार्थस्य· विधिः प्रवर्तकत्वानुपपत्तेर्नहि शिष्टाः धीभावनालिङ्पर्जन्यप्रवृत्तीतिविषयश्चेति· अत्र प्रवर्तनायां
तथाविधशक्तिज्ञानकारणकत्वं तथाविधशक्तिज्ञानप्रयोज्यप्रवृत्तिरूपफले प्रयोजकत्वं तथाविधशक्तिज्ञानस्याभिधा
रूपप्रवर्तनोत्तरकालोत्पत्तिकतया तज्जनकत्वरूपतत्कारणत्वासंभवात्· महावाक्यार्थबोधविषयपदार्थबोधकं पदं विधि
वाक्यस्थं तन्नास्तिता दृशपदस्य कल्पनेनैव महावाक्यार्थबोध उपपादयतीयः आकांक्षाविषयतथाविधशाब्दबोधस्य प्रका
रान्तरेणानिर्वाहे आकांक्षापानिवृत्त्यसंभवेन तथाविधपदस्य कल्पनाया आवश्यकत्वात्· अत्र महावाक्यार्थबोधे स्वर्गभा
वनायां स्वर्गफलकत्वं तु घटेन जलमाहरेत्यादौ छिद्रेतरत्वादिवदनन्वयप्रयोजकरूपत्वेन योग्यताविधया भास
ते· भट्टमतेपि उपदर्शितयोग्यतारूपार्थस्य शाब्दबोधभाननियमात्· एवं प्रवर्तकज्ञानसंपत्त्यर्थमपि तत्र स्वर्गफलक
त्वभानमावश्यकं· यागादेर्निष्फलत्वज्ञानकाले प्रवृत्त्यापत्तिवारणाय निरुक्तस्वकरणकत्वसंबंधेन यागविशि
ष्टायां भावनायामि ष्टसाधनताज्ञानस्य हेतुतायाः भट्टमतेपि सिद्धत्वात्· न च तथाविधेष्टसाधनज्ञानकालेपि यागादे
र्निष्फलत्वज्ञाने बाधकाभावात् तथाविधेष्टसाधनताज्ञाने हेतुत्वमायागादेर्निष्फलत्वज्ञानकाले प्रवृत्त्यापत्तिवार
णाय प्रसक्ते· नुपपन्नमिति वाच्यं· यागादिविशिष्टभावनायामिष्टसाधनताज्ञानकाले यागेपि इष्टसाधनताज्ञानेन

विधि॰ टी॰ ४ य्यस्येनन्तरायागतो निष्फलत्वज्ञानासंभवेनानुपपत्त्यभावादिति। किंच भट्टमतेपि इष्टसाधनताज्ञानस्य हेतुत्वे प्राभाकरमताद्वि
शेषइतिवाच्यं। प्राभाकरमते क्रियायागतेष्टसाधनताज्ञानस्य हेतुत्वापाविशेषसंभवात्। यत्तु। अर्थभावनायत्तेष्टसाधनताज्ञानं
भट्टमते प्रवृत्तिहेतुः। अपितु अभिधायागतेष्टसाधनताज्ञानं। अत एव प्राभाकरमिश्रा अप्याहुः। क्रियायागतेष्टसाधनता
न विध्यर्थः। अपितु अभिधायागतमिति विशेषः। अन्यथा तेषामत्र विध्यर्थत्वकथनासंगतेरिति। तदसत्। तथासति क्रि
यायां निष्फलत्वज्ञानकाले प्रवृत्त्यापत्तिवारणासंभवात्। यागविशिष्टार्थभावनाविशेष्यकइष्टसाधनताज्ञानं हेतुत्वे
तु तद्वारणप्रकारस्योक्तत्वात्। नचैवं सति मिश्रग्रंथविरोधः। लक्षणयाभिधापदार्थस्यार्थभावनाबोधकत्वेनानु
पपत्त्यभावात्। नचैवं सत्यपि मिश्रग्रंथविरोधः। भट्टमते अभिधाया एव लिङर्थत्वेनार्थभावनागतेष्टसाधनत्वस्य [illegible]
तदर्थत्वाभावादिति वाच्यं। तत्र तद्विध्यर्थशब्दस्य विधिप्रतिपाद्यपरत्वेनानुपपत्त्यभावादिति। नन्वेवं सति फलभावना
त्वेनार्थभावनामात्रबोधोस्तु। अर्थभावनायां तथाविधप्रवर्त्तनाविषयत्वभाने तु प्रयोजनं न पश्याम इति चेन्न। तद्भाव
ए पुरुषप्रवृत्तिं प्रति तदनुकूलत्वपरत्विष्टप्रवर्त्तनाज्ञानस्य हेतुताया राजाज्ञादिस्थले क्लृप्तत्वेन तत्संपत्त्यर्थं तथा
विधबोधस्यावश्यकत्वात्। तथाविधबोधेपि कथं तादृशकारणासंपत्तिरिति तु नाशंकनीयं। कृतिसाध्यताज्ञानका राम ४

लेयागोद्देशप्रवृत्त्या पुनिवारणाय प्रवृत्तिं प्रति हेतुत्वेन कृतमस्य कियागतकृतिसाध्यताज्ञानस्य संपन्नत्वे तादृशज्ञानैस्व
प्रयोज्यकृतिजन्यत्वाद्यन्तरस्य स्वविषयत्वसंबंधेन यागादिविशिष्टभावनायां प्रवर्त्तनात्वव्याप्यत्वाभ्युपगमेन तन्त्रतुल्यदृ
ष्टिवेद्यत्वमप्रवर्त्तनायामपि स्वजनककृतिप्रयोजकत्वरूपयाग्याद्यनुकूलत्वेनाबाधस्यावश्यकत्वे पात्थाविधिकारणे
पपत्तेः॥ न च तथापि तादृशविधेर्भावनायामपज्ञादिसहकृतत्वभानं निरर्थकमिति वाच्यं॥ प्रयाजादिसहकारिसंदेहस
पाद्यफलजनकत्वसंदेहसंपादितप्रवृत्तिप्रतिबंधकत्वात्मारणार्थं तस्य यागेतिकारस्यावश्यकत्वात्॥ अत्रापि विशिष्ट
तज्ज्ञाने विशेषणतज्ज्ञानावश्यकत्वेनानुपपत्त्यभावात्॥ न चैवं सत्यपि तत्प्रवर्त्तनायां कृतसार्थवादस्य कृतत्वस्य भाने प्र
योजनाभाव इति वाच्यं॥ तत्र तज्ज्ञानाभावे बलवदनिष्टाननुबंधित्वज्ञानरूपप्रवर्त्तकज्ञानासंपत्तिरिति तत्सपत्स्यर्थं
तज्ज्ञानांगीकारस्यावश्यकत्वात्॥ कृतसार्थवादज्ञानं कथं बलवदनिष्टाननुबंधित्वज्ञानं संपादयतु इति तु नाशंकनीयं॥
तद्घटकीभूतयत्किंचित्पदस्य प्राशस्त्यरूपबलवदनिष्टाननुबंधित्वे सारांगीकारात् तस्मात् सूत्रं ध्वंसं भवादिति॥ अत एव
वार्थवादानां सार्थ्येश्रामाण्यमिति तेषां सिद्धांतः॥ न च तथापि स्वकरणकत्वसंबंधेन तं तं विधिना स्वात्मकशब्दे एका
भिधारूपशब्दभावनास्य घटेः॥ घटज्ञानानंतरं घटज्ञानजन्यज्ञानतारूपतन्मतसिद्धपदार्थवत्॥ न तत्राख्यातस्यामा

२तत्रोल्लिङ्‌पदनिरूपितशक्तिज्ञानभावे प्रमा[illegible]णाभाव इति वाच्यं- करणता को भावना तन्त्र तद्ज्ञानस्याप्यावश्यकत्वात् अयमर्थः

विधि॰ति ५

5

न्यशङ्क्याऽर्थभावनाया उपस्थितिस्तस्यां तर्हि किं भाव्यं केन भाव्यं कथं भाव्यमित्याकारिकाकांक्षा जिज्ञासारूपा जायते तद्
नंतरं तत्तत्पदार्थोपस्थितिसहकारेण तया जिज्ञासया स्वर्गफलिकायागकरणिकाप्रयाजाद्युपकृतेतिकर्त्तव्यताकाभावनेत्सो
कारकार्थभावनाविशेष्यकावान्तरवाक्यार्थबोध उत्पद्यते तत आख्यातभावनापालिङ्पदनिरूपितशक्तिज्ञानाच्छब्दभा
वनाया उपस्थितिः ततः किं भाव्यं कथं भाव्यमित्याकारकजिज्ञासारूपाकांक्षासहकृततत्तत्पदार्थोपस्थितिसहकृ
ततथाविधावान्तरवाक्यार्थबोधाल्लिङ्पदनिरूपितशक्तिज्ञानकरणकस्तत्स्यवाक्यार्थबोधसहकृतप्रवर्त्तनाविषयःस्व
र्गफलिकायागकरणिकाप्रयाजादीतिकर्त्तव्यताकाभावनेत्याकारकार्थभावनाविशेष्यकशब्दभावनाप्रकारकम
हावाक्यार्थबोधः विध्यनुपरक्ताभावनालिङाप्रतिपाद्यत इति तत्सिद्धान्तात् ततः स्कस्य थेवाऽज्ञो नाक्किंचतुष्टयं
भट्टमते बोध्यं तथाहि एकांशशब्दभावनातज्ज्ञानानुकूला तज्ज्ञानस्याकांक्षोत्थापकत्वेन शब्दभावनात्वविशिष्टप्रवर्त्त
नात्वज्ञानानुरोधेन चावश्यकत्वात् अपराप्रवर्त्तनात्वज्ञानानुकूला राजाज्ञादिस्थले प्रवृत्तिजनकत्वेन क्लृप्तस्य
तथाविधज्ञानस्यावश्यकत्वात् अपरा च प्रवृत्त्यनुकूलाभिधाव्यापारात्मा प्रवृत्तिजनकेन शब्देन प्रवृत्तिजननेव्या
पारत्वेन तस्या आवश्यकत्वात् अपरा चाभिधात्वज्ञानानुकूला तज्ज्ञानस्यानुभवसिद्धत्वेनावश्यकत्वादिति शक्ति राम ५

५ यायां बलवदनिष्टाननुबंधित्वज्ञानं चिकीर्षादिकं चोत्पद्यते ततो यागादिरूपक्रियायां प्रवृत्त्युत्पत्तिरिति अत्र तिङ्लावोधिन्नो

चतुष्टयं॥ केचित्त्वभिधागतेष्टसाधनत्वं विध्यर्थ इति तद्द्वारा पञ्चशक्तिचतुष्टयं बोध्यमिति वदंति॥ तदसत्॥ अभिधायाः स्वर्गा
दिरूपेष्टसाधनत्वाभावात्तस्याः पुरुषप्रवृत्तिजनकत्वेऽपि तिवाक्यविरोधापत्तेरिति॥ तस्मादुपदर्शितरीत्यैव शक्तिचतुष्टयं मध्ये मते
उपपादनीयमिति॥ अत्रोच्यते। शक्तिभिन्नस्याभिधाशब्दवाच्यत्वे मानाभावेन कृत्स्नशक्तिकल्पनं। न च परस्माऽप्रवृत्ति
प्रतिपत्तनिष्ठधर्मज्ञानस्य हेतुतायाः उपदर्शितरीत्या आवश्यकत्वात् विधिनिष्ठप्रवर्तनाज्ञानं विना न प्रवृत्तिरिति तदुपपत्त
र्थं विधिनिष्ठातिरिक्तोऽभिधाख्यः पदार्थोऽवश्यं तच्च क्वो वाच्य इति वाच्यं। तादृशकार्यकारणभावे मानाभावात्॥ स्वेच्छा
धीनप्रवृत्तिस्थले बलवदनिष्टाननुबन्धीष्टसाधनताज्ञानहेतुत्वेऽपि वराज्ञादिस्थले पितृशिष्यत्वस्मिन्नसत्प्रवृत्तेरिति हेतुत्वेनाभिधाज्ञा
नाहेतुत्वेऽपि तु संकल्पज्ञानाहेतुत्वं भिधाज्ञानाहेतुत्वं तस्मिन्नसत्यपि प्रवृत्तेरिति हेतुत्वेनानुपपत्तिः॥ नन्वोपदर्शितयुक्त्या
अभिधाया अप्रसिद्ध्याऽभिधाज्ञानाप्रसिद्धेस्तदभावस्याप्यप्रसिद्ध्या सत्यपीतस्याभिधाज्ञानासत्त्वेनास्य थोसंभवेना भावे
भिधाज्ञानाहेतुत्वे च॥ सत्यपि प्रवृत्तेरिति हेतोरप्युपादानं न संगच्छत इति वाच्यं॥ यतो॥ सत्यपीतस्य नाभिज्ञानाद्यभावे स
तीत्यर्थोऽपि त्वभिधापदशाब्दादिज्ञानाभावे सतीत्यर्थः॥ अत्र नानुपपत्तिः॥ अभिधाया अप्रसिद्धत्वेऽप्यभिधापदवाच्या
याः शक्तेः प्रसिद्ध्याः॥ सत्यपीतस्य तज्ज्ञानाभावे सतीत्यर्थस्याबाधितत्वादिति मिश्राः॥ तन्मनोरमं॥ तस्मिन्सतीत्यस्या

विधिवि॰
६
6

भिधायकत्वाच्चाप्रतिज्ञाने सतीस्वर्थकरणे तस्मिन्सत्यप्रवृत्तेरित्यस्याप्यभिधाज्ञानाहेतुत्वेनोपादानसंभवात् ः तस्मात्तस्मि
न्सत्यप्रवृत्तेरित्यस्याभिधायकवाक्यज्ञाने सत्यप्रवृत्तेरितरार्थकरणात्तत्रासत्यपि प्रवृत्तेस्तस्याभिधायकवाक्याप्रतिज्ञाना
भावे सतीष्टार्थकरणात्तत्र पूर्वोक्तसाध्ये च तु इष्टपरत्वतयाविधो भयस्य हेतुत्वेनोपादानसंभवादुपदर्शितसाध्यत्वनुष्ठ
ये हेतुत्वस्यान्वयाभिप्रायेणानुपादेयत्वमेवेति ः अत्र प्रवृत्तिं प्रतिकृतिसाध्यताज्ञानमेव हेतुरिति गुरुमतं । इष्टसाधनता
ज्ञानमपि हेतुरिति नैयायिकमतं ॥ अत्रेष्टसाधनताज्ञानत्वं प्रवृत्तिजनकतावच्छेदकं न वा तत्र इष्टे प्रवृत्तितत्साधनता
ज्ञानाजन्यत्वेन तत्त्वादिविप्रतिपत्त्योऽबोध्याः ः अत्र गुरवः प्रवृत्तिं प्रतिकृतिसाध्यताज्ञानमेव हेतुर्न त्विष्टसाधनताज्ञाना
दि कं मानाभावात् । नन्वत्र कृतिसाधनताज्ञाने हेतुत्वएव किं मानमिति चेन्न रवेः । साक्षात्प्रवृत्तिसजनकप्रवृत्ति
जनकज्ञानं चिकीर्षाद्वारकमिति नियमोस्ति । अत्र साक्षात्प्रवृत्तिजनके उपादानप्रत्यक्षे व्यभिचारवारणाय साक्षा
त्प्रवृत्त्यजनकत्वस्य निवेशः न चैवं सत्यपि फले इच्छाद्वारा प्रवृत्तिजनके फलज्ञाने व्यभिचार इति वाच्यं ः प्रवृत्तिजनकज्ञान
उपायविशेष्यकत्वप्रकारिका चिकीर्षा विशेष्यिकेच्छा पाकं कृत्या साधयामीत्याकारिका । कृतिसाध्यत्वेन पाकमि
च्छामीति तत्र संभवात् ः तत्र तु कृतिसाध्यत्वप्रकारकज्ञानमेव हेतुः इच्छायाः स्वप्रकारकधीसाध्यत्वनियमात् । एवं चोपद एभ ६

रस्यापि निवेशात्तदुपायत्वं चात्र फलान्यत्वं । एवं च ज्ञानेन कृतिरूपफले जननीयचिकीर्षाद्वारत्वं तावद्रूयं वाच्यो । सा च कृतिसाध्यत्वेर

शोध्यपत्रमिदं

स्येष्टदौ प्रवृत्तिनिर्वाहात् तत्रापि पुत्रस्येष्टसाधनताज्ञानकल्पनात् न च तथापि व्यापारभिन्नस्य कारणस्य स्वनिष्ठ
व्यापारद्वारैव परसमवेतव्यापारजनकत्वनियम इति वाच्यं अनुमितिकरणव्याप्तिज्ञाने दोषव्यभिचारेण प्रयोजक
त्वेन च तथाविधनियमाभावादिति यत्तु वैदिकप्रवृत्तिं प्रति संकल्पज्ञानं कारणमिति संकल्पश्च विध्यर्थः संकल्पश्च
फलेच्छा तथा च यजेतेत्यादिवाक्याद्यागविशेष्यकफलत्वाविषयत्वविषयकान्वयबोधः तिप्प्रत्ययस्य जन्यते तदपि सं य
सर्गविधेयेव भासकमिति तदपि न विधितज्ज्ञानस्य प्रवर्तकत्वनियमात् फलेच्छाज्ञानं विनापि फलेच्छादिवशात् प्रवृत्ति
दर्शनेन फलेच्छाज्ञानस्य प्रवर्तकत्वात् फलेच्छायाः स्वर्गकामादिशब्दप्रतिपाद्यत्वेनान्यलभ्यतया तत्र विधिश
क्तिकल्पनस्यासंभवाच्च यदपि वैदिकप्रवृत्तिं प्रत्यपूर्वज्ञानं कारणमिति अपूर्वमेव विध्यर्थः यागादिविषयमपूर्वमि
त्यवशाद्बोधो यजेतेत्यादिवाक्याज्ज्ञायते इष्टसाधनताज्ञानस्य तत्र हेतुत्वे नित्यसंध्यावंदनादावप्रवृत्त्यापत्तिः
नित्यस्य फलाभावेन तत्रेष्टसाधनताज्ञानासंभवादिति तदपि न अनिष्टसाधनताज्ञाने लौकिकप्रवृत्त्यदर्शनेना

विधि॰ नि॰

५८

वश्यकल्पनीयप्रवृत्तिहेतुताकेष्टसाधनताज्ञानेनैव सर्वत्र प्रवृत्तिसंभवे प्रवृत्तिप्रत्यक्षपूर्वज्ञानस्य हेतुत्वे मानाभावात्।
नैवं सति नित्यसंध्यावन्दने प्रवृत्त्यनुपपत्तिरिति वाच्यं। नित्यसंध्यावन्दनजन्यफलस्यापि अवश्यस्थापनीयत्वेनानुपप
त्त्यभावादिति। एतेन यागादिविषयकभावनाज्ञानमेव प्रवर्तकमपि समर्थभावनेन लिङः। यः तस्या आख्यातसामान्यवा
च्यत्वेन यावत्सु तेन लिङः पदवाच्यत्वस्यासमर्थत्वात्। एवं च यजेतेति वाक्याद्यागानुकूलभावनेत्येवं बोधः स्यादपि
परास्तं। लौकिकप्रवृत्तिस्थले वश्यकल्पनीयप्रवृत्तिहेतुताकेष्टसाधनताज्ञानेनैव सर्वत्र प्रवृत्तिसंभवे वैदिकप्रवृ
त्तिप्रत्यक्षभावनाज्ञानस्य हेतुत्वे मानाभावादिति। अत एव तत्ताभिधायकलापूर्वभावनाज्ञानं न प्रवर्तकं तस्मि
न्सत्यपि प्रवृत्तेः अप्रतिप्रवृत्तेश्च निविधिवादे चिंतामणिकारादिस्तथैवोक्तं तत इति। न चाक्रतसिन्नसत्यप्रवृत्ते ह
रिति हेतोरभिधाज्ञानस्याहेतुत्वेऽप्यन्वयव्यतिरेकाभ्यां संगतः उपदर्शितयुक्त्याभिधायाअप्रसिद्ध्या तज्ज्ञानस्याप्यसिद्धेः
रस्मिन्सतीत्यस्याभिधाज्ञानेऽसतीत्यर्थासंभवादिति वाच्यं॥ राम

५८

शितचिकीर्षाद्वाराकृतिसाध्यत्वप्रकारकरूपाकविशेष्यकज्ञानमेवप्रवृत्तिहेतुरिति॰ नचोपायेच्छांप्रतीष्टसाधनताज्ञान
हेतुतयोपायविशेष्यकचिकीर्षायामपीष्टसाधनताज्ञानजन्यत्वमावश्यकमितिप्रवृत्तिंप्रतिचिकीर्षाद्वारेष्टसाध
नताज्ञानमपिहेतुरितिवाच्यं॰ गुरुमतेसाध्यताप्रकारकेच्छांप्रतिविशेष्यतासंबंधेनसुखदुःखाभावान्यतरज्ञानमात्रस्ये
वहेतुतयासाध्यताप्रकारकोपायेच्छानभ्युपगमेनोपायेच्छांप्रतीष्टसाधनताज्ञानंकारणंतदैवचिकीर्षाद्वाराप्रवृत्तिंप्रतिकृ
तिसाध्यताज्ञानस्यसाधनताज्ञानेहेतुत्वप्रसंगाभावात्। अथचिकीर्षांप्रतिकृतिसाध्यताज्ञानंकारणंतदैवचिकीर्षाद्वा
राप्रवृत्तिंप्रतिकृतिसाध्यताज्ञानेहेतुः सान्नेष्टंविना कल्पनीयचिकीर्षानियतपूर्ववृत्तितानन्यथासिद्धत्वाभयकृतिसा
ध्यताज्ञानापेक्षयाभयमतात्कृप्ननियतपूर्ववृत्तिताकस्यकृतसाध्यताज्ञानाभावेस्येवानन्यथासिद्धत्वमात्रकल्प
नयालाघवेनचिकीर्षाहेतुताभ्युपगमसम्भवात्नचतत्रकल्पनालाघवसत्वेपिकारणतावच्छेदकलाघवात्तत्रकृतिसाध्य
ताज्ञानेत्वेनैवहेतुत्वमुपपन्नमितिवाच्यं॰ तन्मतेऽवच्छेदकलाघवापेक्षयाकल्पनालाघवस्यैवबलवत्त्वेनतथावक्तु
मशक्यत्वात्॰ अतएवगुरुमतेविसंवादिप्रवृत्तिंप्रतीष्टभेदाग्रहएवहेतुर्नतुविशिष्टज्ञानमित्यपिसंगच्छते॰ अन्यथा
कारणतावच्छेदकलाघवेनतत्रापिविशिष्टज्ञानेहेतुताकल्पनप्रसंगात्॰ नचचिकीर्षांप्रतिबंधकाभावस्यहेतुत्वे प्रति

विधिवि:
८
7

कृतिसाध्यत्वाभावप्रकारकज्ञानकृतिसाध्यमिदंप्रकारकज्ञानकृतिसाध्यत्वाभाववादिमाणप्रकारकज्ञानाभावत्वा
दिनाचिकीर्षांप्रतिनानाहेतुत्वकल्पनेगौरवमितितद्द्वयस्थानेतत्रकृतिसाध्यताज्ञानैकहेतुताकल्पनेलाघवमिति
वाच्यं यत्रभ्रमविज्ञानमप्रमेस्यप्रामाण्यज्ञानंतदृनंतरंकृतसाध्यत्वज्ञानंतदुत्तरंकृतिसाध्यताज्ञानमप्रामाण्यज्ञा त्या
नाशास्कन्दितंतदुत्तरंचिकीर्षापत्तिवारणायतत्रकृतिसाध्यताज्ञानेहेतुत्ववाच्यंतेनापिकृतसाध्यत्वज्ञानाभावेहेतुताया अ
वश्यकल्पनीयत्वेनकृतिसाध्यताज्ञानत्वेनहेतुत्वकल्पनेगौरवानुपदर्शितयुक्त्यापिकृतिसाध्यताज्ञानेहेतुतासिद्धेर
तिचेन्न। अनयोरेकतरंबाध्यंविरुद्धार्थग्राहकत्वादितियुक्तौपदर्शितस्थलेकृतिसाध्यताज्ञानकृतसाध्यताज्ञानयो
रेकतराप्रामाण्यज्ञानस्यावश्यकतयाचिकीर्षापत्तेरभावेनप्रकृष्टकृतिप्रसङ्गप्रामाण्यज्ञानाभावविशिष्टकृतसाध्यतादिज्ञाना
भावहेतुतायाआवश्यकतयोपदर्शितलाघवेनाप्रामाण्यज्ञानाभावविशिष्टकृतिसाध्यताज्ञानत्वेनैवतत्रहेतुताकल्पन
स्योचितत्वादिति। यत्तिच्छायाः सप्रकारकधीसाध्यत्वनियमेनकृतिसाध्यत्वप्रकारकेच्छारूपचिकीर्षांप्रतिकृतिसाध्यता
ज्ञानत्वेनहेतुताकल्पनमावश्यकमिति। तदृप्यसत्। सत्वस्यानुगततयानियमस्यतत्त्वक्तिविश्रान्ततयाप्रयोजनाभावेनाद्र
तादृशनियमस्याकल्पनीयतयोपदर्शितयुक्त्याकृतिसाध्यताज्ञानस्यहेतुतासिद्धेरिति। केचित्तु जनकीभूतज्ञानंविषयत एम

एवं ज्ञानस्य प्रतिबंधकत्वमिति नियमबलाच्चिकीर्षां प्रति कृतिसाध्यताज्ञानस्य हेतुतासिद्धिः नियमार्थश्च यत्र २ ज्ञाननि
ष्ठयन्निरूपितप्रतिबंधकत्वं तत्र तज्जनकीभूतज्ञानविघटकत्वमिति। नचात्र बाधनिश्चयाभावव्याप्यवत्ताज्ञानादेर्विशिष्टबुद्धि
प्रतिबंधके विशिष्टबुद्धिजनकाविघटके व्यभिचार इति वाच्यं ज्ञाने साक्षाद्विरोधित्वविशेषणात् नचैवं सिद्धपूर्वपक्षिमते
हेतुः स्वरूपासिद्धः कृतिसाध्यताज्ञाने चिकीर्षायाः साक्षात्प्रतिबंधकत्वस्य तन्मते सम्मतत्वादिति वाच्यं साक्षाद्विरोधित्व
विशिष्टयत्प्रतिबंधकज्ञानांतस्य स्वाभावनिष्ठकारणताप्रतियोगिककार्यताश्रयज्ञानभिन्नस्य प्रतिबंधकज्ञानस्या
र्थपर्यवसन्नत्वात् तज्जनकज्ञानविघटकमवश्यं भवतीति नियमः पर्यवसन्नः स्वपर्याप्तमत्र प्रतिबंधकीभूतज्ञानपर्यंत
य्याप्तस्वाभावनिष्ठकारणताप्रतियोगिककार्यताश्रयज्ञानभिन्नयन्निरूपितप्रतिबंधकज्ञानं तज्जनकज्ञानविघटक
मवश्यं भवतीति नियमः पर्यवसन्नः अत्र तत्प्रतिबंधकत्वप्रयोजकीभूताभावप्रतियोगित्वं न तु तत्कारणीभूताभावप्रति
योगित्वं कृतिसाध्यताज्ञानाभावस्य चिकीर्षाजनककृतिसाध्यताज्ञानजनकत्वेनान्यथासिद्धत्वापत्तेः सिद्धांतिमते हे
तोः स्वरूपासिद्ध्यापत्तेः। विघटकत्वं तु प्रतिबंधकत्वं [redacted] एवं चापरदर्शितनियमबलाच्चिकीर्षाप्रतिबंधककृतिसा
ध्यताज्ञाने चिकीर्षाजनकज्ञानविघटकत्वसिद्धौ पक्षधर्मताबलाच्चिकीर्षाजनककृतिसाध्यताज्ञानविघटकत्वसि

धि॰वि॰नि॰ ध्यासाध्यघटकत्वेन कृतिसाध्यताज्ञानेन चिकीर्षाजनकत्वमिति द्वितीयसाधकं तदसत् अनुकूलतर्कस्य विरहेण तादृशनियमासि
८ द्ध्या उपदर्शितयुक्त्या कृतिसाध्यताज्ञानहेतुत्वासिद्धेः इति तस्मादुपदर्शितयुक्त्यैव चिकीर्षाप्रति कृतिसाध्यताज्ञानहेतु
40 तासिद्धिरिति प्रवृत्तिं प्रति चिकीर्षाद्वारा कृतिसाध्यताज्ञानमेव हेतुरिति ननु तत्र एकविशेष्यककृतिसाध्यताज्ञानाद
न्यविशेष्यकप्रवृत्त्यापत्तिर्दुर्वारा न च विशेष्यतासंबंधेन प्रवृत्तिं प्रति विशेष्यतासंबंधेन कृतिसाध्यताज्ञानं कारणमिति वाच्यं
यतः प्रवृत्तेरसिद्धविशिष्टसिद्धविशेष्यकत्वनियमेनासिद्धघटादिविशिष्टसिद्धकपालाद्युपादानविशेष्यकैव प्रवृत्तिरुपेया
तथा चोपादाने व्यभिचारो दुर्वार इति चेन्न साध्यताख्यविषयतासंबंधेन प्रवृत्तिं प्रति विशेष्यतासंबंधेन कृतिसाध्यताज्ञा
नस्य हेतुत्वकल्पनेन उपदर्शितव्यभिचाराभावात् उपादाने प्रवृत्तेः साध्यताख्यविषयतानभ्युपगमात् न च प्रवृत्तेः सा
ध्यताख्यविषयतायां मानाभाव इति वाच्यं घटं करोमीत्याकारकघटनिष्ठसाध्यताककृतिविषयकानुव्यवसायात् स्व
प्रवृत्तिनिरूपितसाध्यताख्यविषयतासिद्धेः न च तादृशानुव्यवसायस्य घटविषयताककृतेरेव विषयत्वमिति वाच्यं तथा
सति घटसाध्यककपालोपादानककृतिमत्त्वे कपालं करोमीति प्रतीत्यापत्तेः कपाले तादृशप्रतीतेरुपादानताख्यवि
षयतासत्त्वेन कपालविषयकप्रवृत्तेस्तत्र सत्त्वात् एवं प्रवृत्तेरुपादानताख्यविषयतापि उपादाननिष्ठा अतिरिक्ता च राम
८

श्यमुपेयात् अन्यथा कपालेन घटं करोमीत्यत्र तृतीयार्थानुपपत्तेः न च तत्र घटान्वितजन्यत्वमेव तृतीयार्थ इति वाच्यं
एवंविधस्थले तृतीयार्थस्य धात्वर्थान्वयप्रसक्तेः अन्यथा कपालेन घटं करोमीतिवत् तन्तुदण्डयवेनतद्भस्मानयामी
त्यादिव्यवहारस्याप्युपपत्तेः न च विषयत्वमेव तत्र तृतीयार्थ इति वाच्यं तथा सति घटत्वेन घटं करोमीत्यादिव्यवहारस्या
पत्तेः तस्मात् तृतीयार्थस्य धात्वर्थान्वयसम्भवेन कपालेन घटं करोमीत्यत्र विना प्रवृत्तेरुपादानत्वावच्छिन्नविषयत्वे धात्व
र्थे तृतीयार्थान्वयानुपपत्त्या प्रवृत्तेरुपादानत्वावच्छिन्नविषयत्वाङ्गीकारस्यावश्यकः अत एव कपालाद्युपादानप्रत्यक्ष
जन्यतावच्छेदकमपि निरुक्तं उपादानत्वावच्छिन्नविषयतानिरूपितप्रवृत्तित्वमेव तज्जन्यतावच्छेदकत्वात् न तु
मोवच्छिन्नं प्रवृत्ति उपादानप्रत्यक्षस्य घटादिजनकत्वप्रकारककपालाद्युपादानगोचरलौकिकप्रत्यक्षत्वेन हेतुत्वमि
ति उपादानमत्रकारणं एवं प्रवृत्तेरुद्देश्यत्वावच्छिन्नविषयतापि फलनिष्ठातिरिक्तावश्यमुपेया अन्यथा जलाहरण
मघं करोमीत्यादौ तृतीयार्थानुपपत्तेः न च तत्र विषयत्वमेव तृतीयार्थ इति वाच्यं तथा सति घटत्वाय घटं करोमीत्या
दिव्यवहारस्याप्युपपत्तेरिति तस्मादुपदर्शितयुक्त्या अवश्याभ्युपेयप्रवृत्तिनिष्ठविषयतात्रयं ततः पाति साध्यत्वावच्छिन्नविषयता
संबन्धेन प्रवृत्तिं प्रति तत्साधकप्रवृत्तिं प्रति वा विशेष्यतासंबन्धेन कृतिसाध्यताज्ञानस्य तत्तदुपायविशेष्यककृति

धिविनि॰ २ १

साध्यताज्ञानस्यैवाहेतुत्वकल्पनेनैव उपदर्शितकार्यकारणभावेन व्यभिचारादिदोषपरिहृतिः अत्रैसोंस्लोपाध्यायाः स
न्प्रत्ययस्य धात्वर्थगोचरेच्छावाचकत्वनियमेन चिकीर्षापदात् कृतिविषयकेच्छाया एव बोधात् कृतिविशेष्यकेच्छैव चि
कीर्षापदार्थः नच चिकीर्षापदं न यौगिकं अपितु रूढमिति वाच्यं तथापि कृतिविषयकेच्छात्वे चिकीर्षापदशक्यताव
च्छेदकत्वकल्पनेन प्रवृत्तिनिमित्तलाघवात् कृतिविषयकेच्छाया एव चिकीर्षापदार्थत्वाभ्युपगमात् अन्यथा कृति
साध्यत्वप्रकारकेच्छायास्तदर्थत्वाभ्युपगमे कृतिसाध्यत्वविशिष्टविषयकेच्छात्वस्य तच्छक्यतावच्छेदकत्वकल्पने गौरवा
त् कृतिविषयकेच्छैव चिकीर्षापदार्थः एवंचानुकूलतासंबंधेन पाकविशिष्टविषयकेच्छात्वस्य तच्छक्यतावच्छेदकत्व
कल्पने गौरवात् कृतिविषयकेच्छैव चिकीर्षापदार्थः एवंचानुकूलतासंबंधेन पाकविशिष्टायाः कृतेर्विशेष्यकेच्छा
रूपचिकीर्षैव प्रवृत्तिहेतुः नतु पाकविशेष्यककृतिसाध्यत्वप्रकारिकेच्छा कृतिसाध्यत्वप्रकारिकेच्छात्वं तत्र कृति
साध्यत्वस्य संबंधनिवेशे कारणतावच्छेदके गौरवात् तथाच पक्वान्नविशेष्यकसाध्यताप्रकारकेच्छां प्रति इष्टसा
धनताज्ञानस्य हेतुता या कृतीच्छास्थले क्लृप्ततया पाकविशिष्टकृतीष्टसाधनताज्ञानजन्यैव पाकविशिष्टकृतीच्छा
रूपचिकीर्षा अतएव दर्शितचिकीर्षाद्वारा कृतीष्टसाधनताज्ञानमेव प्रवृत्तिहेतुर्न तु कृतिसाध्यत्वप्रकारकज्ञानमिति २

कृतीष्टसाधनत्वमेव विध्यर्थ इति। नैवं सति पाके कृत्यसाध्यताज्ञानकाले प्रवृत्त्यापत्तिः तदा पाकविशिष्टकृतित्ववि
शेष्यकेष्टसाधनत्वप्रकारकज्ञानात्मकप्रवृत्तिकारणसत्त्वे बाधकाभावादिति वाच्यं। यतः कृतेः अनुकूलतासंबंधेन पा
कवैशिष्ट्याभावेन पाके साध्यतासंबंधेन कृतिवैशिष्ट्याभासतः साध्यत्वानुकूलत्वयोस्तुल्यवित्तिवेद्यत्वनियमात्। एवं च
पाके कृत्यसाध्यताज्ञानकाले अनुकूलतासंबंधेन कृतेः पाकवैशिष्ट्यज्ञानं संभवति: तदा पाके साध्यतासंबंधेन कृति
वैशिष्ट्यावगाहिज्ञानोत्पादिकायास्तथाविधबाधाभावादिघटितविशिष्टसामग्र्या अभावात्तेनोपदर्शितबाधका
लप्रवृत्त्यापत्तिः सोऽस्त्वमत इति: न च साध्यत्वाभाववज्ज्ञानस्य साध्यतासंबंधावगाहिज्ञानप्रतिबंधकत्वमीनाभावाइ
तिवाच्यं: तत्संसर्गकबुद्धिं प्रति तदभाववत्त्वावगाहिबुद्धेरपि प्रतिबंधकत्वस्य बाधबुद्धिविचारे व्यवस्थापितत्वादित्याहुः। त
त्रमनोरमं: येनानुगतेनापि कृतिसाध्यत्वप्रकारकेच्छा प्रवृत्तिं प्रति हेतुर्येन तन्मतेन कारणतावच्छेदकगौरवमुद्भावनी
यं: अपि तु तन्मते साध्यतासंबंधेन कृतिविशिष्टपाकविषयकेच्छात्वेन तत्र हेतुता। ननु तत्र पाकविशिष्टकृतिविषय
केच्छात्वस्यापि तत्र तत्राभिन्नविशेष्यकत्वरूपगौरवसहात्तत्तादृशगौरवज्ञानस्यापि कारणताग्रहप्रतिबंधकत्वा
तः अत एव चिंतामणिकारैरपि भिन्नविशेष्यकत्वे गौरवं। समानविशेष्यकत्वे लाघवमित्यादिग्रंथेन सोऽस्त्वमेत

द्वेषणाप्रसक्तावितरथैवोक्तं एवं च प्रवृत्तिं प्रति पाकविशेष्यकसाध्यतासंसर्गककृतिप्रकारिकाइच्छा चिकीर्षापदवाच्यापि हे
तुरुपदर्शितलाघवात् तथा च प्रवृत्तिं प्रति तथाविधेच्छाद्वारा पाकसाध्यतासंसर्गककृतिप्रकारकज्ञानमेव हेतुर्न तु कृती
ष्टसाधनताज्ञानमपि तथा प्रवृत्तिजनकेच्छायां तस्य हेतुत्वात् । कृतीष्टसाधनत्वे विधेः शक्तिरिति नैयायिकगौरवान्ः गुरुमते आ
ख्यातसामान्ये शक्तेर्वोपदर्शितप्रकारकज्ञानस्य विधितउपपत्ता विधेः स्वतन्त्रशक्तिकल्पने लाघवाच्च गुरुमते निष्क
र्षेण प्रवृत्तिं प्रति सोऽस्त्वोपाध्यायोक्तकृतीष्टसाधनमात्रज्ञानहेतुतायाः असंभवयुक्तिकत्वमिति ः अत्र त्वगुरुमते प्रवृत्तिं
प्रति कृतिसाध्यत्वप्रकारिकेच्छाकारणं तथापि सोऽहल्लोपाध्यायमनुपपन्नमेव ः तथा हि ः गुरुमते सुखदुःखाभावान्यतरा तम
विशेष्यकसाध्यताप्रकारिकायाः इच्छायाः आलोकतेन तृप्तिर्भवत्विति इच्छायाः अथलीकतया फलान्यविशेष्यकसाध्यता
प्रकारकेच्छाप्रतीष्टसाधनताज्ञानत्वेन हेतुत्वात्कृसतया पदर्शितरीत्या सोऽहल्लमतोपपादनासंभवात् ः नैवं संति तृप्तिविष
यकेच्छाविल्लोपापत्तिरिति वाच्यं ः तृप्तिसाध्यं सुखं भवत्विति इच्छायाः एव तृप्तिविषयतया तल्लोपाभावादिति ः तथा च पाककृति
शिष्टकृतीच्छायाः प्रवृत्तिहेतुत्वेन तत्र इष्टसाधनताज्ञानत्वेन स्वातन्त्र्येण हेतुता कस्यापि लेखे प्रवृत्तिं प्रति तथाविधेच्छाद्वारा कृतीष्ट
साधनताज्ञानस्य हेतुता वाच्या सोऽहल्लोपाध्यायैः इतिजनकतासंबंधेन पाकविशिष्टाकृतिरिष्टसाधनमिति ज्ञानत्वेन तत्र राम

हेतुत्वकल्पनेकारणतावच्छेदककोटौपाकानुकूलत्वैतन्नपाकगोचरकृतिसाध्यत्वप्रकारकज्ञानेहेतुत्वस्योभयसंमतत्व
यापाकगोचरप्रवृत्तिंप्रति+इष्टसाधनतयोर्विशेषेणहेतुत्वस्यतन्मतेऽवश्याविहरणीयत्वमेव।गुरुमतेतुपाकादिगोचरप्रवृत्तिंप्रति
पाकविशेष्यककृतिसाध्यत्वप्रकारकेच्छात्वेनहेतुत्वे [redacted] +पाकविशेष्य
ककृतिसाध्यताज्ञानत्वेनहेतुत्वकल्पनेलाघवस्यातिस्फुटत्वेनेतिपाकादिगोचरप्रवृत्तिंप्रतिपाकविशेष्यककृतिसाध्यत्वप्रका
रकेच्छायाहेतुत्वकल्पनमुपदर्शितेनसौहृत्वमतमनुपपन्नमेवेतिःपरास्तं।सोऽहंलोपाध्यायैः सनोधात्वर्थगोचरेच्छायांवाच्यकत्वनियमे
नप्रवृत्तिनिमित्तलाघवेनचकृतिविशेष्यकेच्छैवचिकीर्षापदार्थइतितद्दूषितं [redacted] मान [redacted] वश्यकत्वात्ःनचैवंसत्युपदर्शि स
तनियमभंगापत्तिरितिवाच्यंःतादृशनियमे विशेष्यत्वानुभवानयथानुपपत्त्याकृतिसाध्यत्वप्रकारकेच्छायाःसाध्यतासंबंधाव
च्छिन्नकृतिनिष्ठप्रकारताकेच्छायावाचिकीर्षापदार्थत्वस्युपगमस्यावश्यकत्वात्ःनचैवंसत्युपदर्शितनियमभंगापत्ति
रितिवाच्यंःतादृशनियमेमानाभावात्।उपदर्शितानुभवान्यथानुपपत्त्याप्रवृत्तिनिमित्तगौरवस्याप्रामाणिकत्वयाद्दोषत्वा
च्च।यद्दियचिकीर्षेतीत्यादौकृधातोःसाध्यत्वप्रकारकादेर्लक्षणांविनापिशाब्दबोधोनुभवसिद्धइत्युच्यतेतदासाध्यतासं
बंधावच्छिन्नप्रकारितासंबंधेनकृतिविशिष्टेच्छैवचिकीर्षापदार्थइत्यभ्युपगमणीयंःननुकृतिसाध्यत्वप्रकारकेच्छायाउपदर्शित

विधिःनि: संबंधेन कृतिविशिष्टेच्छायाश्चाविकीर्षायाश्च सत्त्वे कृत्यतिरिक्तप्रयत्नः पाकादेः सिद्धत्वज्ञानकालेन तथाविधेच्छाया अनिवृत्त्यापत्तिः।
११ धनलाभोद्देशेन प्रीतासाध्यपापाधीनसिद्धत्वज्ञानकालेपि प्रतिग्रहसाध्यत्वप्रकारकधनलाभेच्छायास्तत्साध्यताविषयकेच्छायाः प्रतित
द्युपाप्याधीनसिद्धत्वज्ञानस्यैव प्रतिबंधकतयाऽन्योपापाधीनसिद्धत्वज्ञानकालेऽप्यसाध्यत्वविषयकेच्छोत्पत्त्यो बाधकाभावादि
तिचेन्नः तद्धर्मावच्छिन्नोद्देश्यकेच्छां प्रति तद्धर्मावच्छिन्नविशेष्यताकसिद्धत्वज्ञानस्यैव प्रतिबंधकत्वपापाकत्वसामानाधिकरण्ये
नपाकत्वावच्छिन्नविशेष्यताकाभोपापाधीनसिद्धत्वज्ञानकालेपि कृतिसाध्यत्वप्रकारकेच्छायानिवृत्तिसंभवात्ः संबंधं सति धर्मत्वा
वच्छिन्नधनलाभत्वसामानाधिकरण्येन प्रीतासाध्यपापाधीनसिद्धत्वज्ञानकालेपि प्रतिग्रहसाध्यत्वप्रकारकेच्छायानिवृत्ति
संभवात् अन्येवं सति धनलाभत्वावच्छिन्नधनलाभत्वसामानाधिकरण्येन प्रीतासाध्यपापाधीनसिद्धत्वज्ञानकालेपि प्रतिग्रहसा
ध्यत्वप्रकारकधनलाभत्वावच्छिन्नोद्देश्यताकेच्छाया अनुत्पत्त्यापत्तिरिति वाच्यं इष्टत्वात्ः धनलाभोत्तरत्वावच्छिन्नोद्देश्यके
च्छाया एवोत्पाद्यमभ्युपगमात्ः अत एव चिंतामणिकारोपि प्रीतासाध्यधनलाभसिद्धे प्रतिग्रहेण तल्लिप्सा नास्त्येवेत्याह। अथवानुभ
वानुरोधेन प्रतिबध्यप्रतिबंधकभावस्य कल्पनीयत्वपापाकत्वावच्छिन्नोद्देश्यताककृतिसाध्यत्वप्रकारकेच्छां प्रति पाकत्वावच्छे
देनैव तथात्वो धनलाभत्वसामानाधिकरण्येन प्रीतासाध्यसिद्धत्वज्ञानकालेन धनलाभत्वावच्छिन्नोद्देश्यताकप्रतिग्रहसाध्यत्वप्रका रक
वच्छेदेन सिद्धत्वज्ञानस्यैव पाकत्वसामानाधिकरण्येन सिद्धत्वज्ञानस्यापि प्रतिबंधकत्वज्ञानमुपेयते अन्यत्र तल्लिप्साद्यनुत्पत्त्यवच्छेदके धर्मो २

एकेच्छानुपपत्तिरिस्नु पदर्शितप्रतिबध्यतावच्छेदककोटिप्रविष्टोद्देश्यकत्वं विलक्षणविषयत्वादिशेषो विशेष्यतादेशेपक्षयाति
रिक्तः तत्र तन्निवेशात कृत्यालाघवपादानमिदंतत्तानस्यायांघटादिजनकत्वेनकयालाघवपादानविषयकलौकिकप्रत्यक्षा
नंतरं घटादिजनककपालेभवतिसाधुपादानेच्छास्ति। तत्रोपादानोद्देश्यत्वास्यविषयतानभ्युपगमात् अन्यतरत्वात्तादृशेच्छा
सत्तोपादानाभावश्चेदिवाच्यं उपादानप्रसक्तस्यैवोपादानेच्छायामपि प्रवृत्तिंप्रतिसाक्षाद्धेतुत्वोपगमे तद्दानभ्युपगमस्यावश्य
कत्वात् यद्विचोपादानेच्छानप्रवृत्तिप्रतिहेतुः किंतूपादानप्रसक्तमेव सुघटते तदायदर्शितस्थलेउपादानेच्छायांउक्तरेपिच्छा
तत्प्रतिबध्यतावच्छेदककोटाबुद्देश्यतामनिवेश्यमुख्यविशेष्यतानिवेशेप्यनुपपत्त्यभावश्चेति। अत्र प्रतिबध्यतावच्छेदक
कोटिप्रविष्टसिद्धत्वंकाचित्कृत्त्वेमानंध्वंसप्रतियोगित्वसत्तिकत्वरूपोतस्तत्तंकाचित्कृत्त्वेमानध्वंसप्रतियोगिक्षणाहत्तितो[redacted] दिकं
धासंबंधेनकृतिविशिष्टस्य तद्विषयकेच्छायावाचिकीर्षापदार्थत्वेवाधिकाभावेनकृतीच्छायास्तथात्वेदर्शितसाधककासा
धनत्वकृतिसाध्यत्वप्रकारिकेच्छाइयं। तस्मात्कृतिसाध्यत्वप्रकारकेच्छायांतथाविधकृतिविशिष्टविषयकेच्छैवचिकीर्षा सा
पदार्थः एवमुपदर्शितयुक्त्यापदर्शितचिकीर्षायाएवप्रवृत्तिहेतुत्वेतद्द्वाराप्रवृत्तिंप्रतिकृतिसाध्यताज्ञानमेवहेतु
रिति अनुमाणपंचकसंचारप्रश्नस्यापनिर्हुतोरेवः प्राणपंचकसंचारस्यजीवनयोविफलसाधनतयातत्रप्रवृत्त्या

३ साध्यतावच्छेदकसंबंधेनकृतिविशिष्टस्य तद्विषयकेच्छायावाचिकीर्षापदार्थत्वेबाधकाभावेनकृतीच्छायास्तथा २
३ त्वेदर्शितसाधकाभावेनचकृतिसाध्यत्वप्रकारिकेच्छा २

४त्वविषयता तन्निरूपितोपायनिष्ठविषयताशालिज्ञानत्वेन प्रवृत्तिहेतुताबोध्या न तु चिकीर्षाधीनत्वावच्छिन्नविषयता ४
४घटितोपदर्शितधर्मेणेन तथा। तथा सति कृतसंशे चिकीर्षाधीनत्वा ४

विधि०नि० ११ पादकृतिसाध्यताज्ञानसंभवादिति चेन्न। तत्कृतसंशे चिकीर्षाधीनत्वनिवेशात्। प्राणपंचकसंचारस्य चिकीर्षा[illegible]
[illegible]हेतुत्वेन दूरापन्निप्रवृत्तिचिकीर्षाधीनकृतसाध्यतया न प्रवृत्तसापादकचिकीर्षाधीनकृतिसाध्यताज्ञानासंभवात्। अत्र
12 कृतित्वावच्छिन्नाया चिकीर्षाधीनकृतिनिष्ठविषयतानिरूपितायाः साध्य[illegible]पादनत्तप्रवृत्त्यापादकचिकीर्षाधीनकृ[illegible]
[illegible]विषयककृतिसाध्यताज्ञानात्प्रवृत्त्यनुपपन्नेरिति। अत्र मिश्राः चिकीर्षाधीनकृतिसाध्यताज्ञानस्य तत्र हेतुत्वे पिता
दृशकृतिसाध्यताभ्रमात् प्राणपंचकसंचारे प्रवृत्त्यापत्तिर्दुर्वारेति प्राणपंच[illegible]कसंचाराद्यप्रवृत्तिविशे
ष्यतासंबंधेन कृतिसाध्यताज्ञानं प्र[illegible]प्राणपंचकसंचारे प्रवृत्त्यापादनासंभवादिष्टसाधन[illegible]प्रवृत्तिहेतुरित्यवश्यं वाच्यः
तथा च तत्कृतसंशे चिकीर्षाधीनत्वनिवेशाऽपार्थक्यात्तत्र तदनिवेशप्युपदर्शितप्रत्यासत्त्या कृतिसाध्यताज्ञानाभावादेव प्राण
पंचकसंचारे प्रवृत्त्यापादनासंभवादिष्टसाधनत्वे न। तथापि घटादौ जीवनयोनियत्नसाध्यताज्ञानबलात् प्रवृत्त्यापत्तिवारणा
यतत्कृतसंशे चिकीर्षाधीनत्वनिवेशस्यावश्यकत्वात्। न चैवं प्रत्ययोपदर्शितस्थले न प्रवृत्त्यापत्तिरितिवाच्यं। तदानीं स्वाभा[illegible]
पंचकसंचारेऽप्युपदर्शितरीत्या प्रवृत्तिवारणासंभवेन तथात्वविशेषणतापाः प्रत्यासत्तिता अप्युपगमस्य व्यर्थत्वात्। यदि चानुभ
वविरुद्धत्वेन तादृशे तत्प्रत्यापत्तिर्न संभवतीत्युच्यते तदा घटादावपि जीवनयोनियत्नसाध्यताज्ञानकाले प्रवृत्तेरनुभवविरुद्धाया। राम १२

वि

ऽापत्तेरिष्टापत्त्यसाधारण्यासंभवश्चेति तद्वारणार्थमुक्तं शिनकारणतावच्छेदककोटिगोचरत्वं शेषे चिकीर्षाधीनत्वनिवेशन
मावश्यकमेव। तत्र ब्रह्मसंशेषत्वरूपसन्निविष्टं न तु ज्ञातमिति। अत एव विधिवादे चिंतामणिकारोप्याह। यथा गोस्तनतरस्कन्धा
फलश्चितामहिष्यादिश्चान्तरप्रधानकर्मादिव्यक्तिविशेषाधेनुपदेनोच्यंते न तु गोत्वमपि तथा चिकीर्षापीति। एतदर्थार्थस्कन्धः प
याशुद्धे तन्नरस्कन्धे नधेनुपदशक्त्या विषयेण गृह्यते तेन पत्नश्चितावासितामहिष्यादिभिन्नप्रधानकर्मव्यक्तयो धेनुपदेनोच्यंते धेनुपद
शाब्दबोधविषयाश्च भवंति न तु गोत्वमपि तादृशशाब्दबोधविषयः तथा चिकीर्षाधीनत्वमपि अन्तो नञ्जातनयोनिपतत्वचिकीर्षा
छा। धीनत्वमप्रकारत्वेन यथाविधायपत्तिरिति। अत्रैवधीनत्वमेवार्थोस्तु कृतिसाध्यत्वप्रकारकेच्छाधीनत्वं। तत्र कृतिसाध्यत्वप्रकार
कत्वस्य निवेशप्रयोजनाभावात्। नैवं संस्कारेच्छांशे संशमात्रनिवेशेनैव भोजनादिनांतरीयकभ्रमेप्रवृत्त्यापत्तिवारणासं
भवेन तत्र प्रवृत्त्यापत्तिवारणार्थं स्वेच्छाधीनत्वस्य कृतिविशेषणत्वादिसादिना चिंतामणिकारेण कं पत्नसंशेषत्वानंतमेण स्व
छाधीनत्वविशेषणांत दृसंगतमिति वाच्यं स्वेच्छाधीनत्वस्य कृतिविशेषणत्वादिसस्य पूर्वोक्तचिकीर्षाधीनत्वपरार्थेच्छाधीन
त्वघटकेच्छांशे संशस्यानिवेशादित्यर्थकत्वेनानुपपत्त्यभावादिति। अत्र स्वपरं प्रवृत्तिविषयतत्तद्व्यक्तिपरं तथा च तत्तद्व्यक्ति
विषयकप्रवृत्तिं प्रति तत्तद्व्यक्तिविषयकेच्छाधीनकृतिसाध्यताज्ञानं कारणमिति निष्कर्षो बोध्यः। नवीनास्तु चिकीर्षाधीनकृ

विधिनि०
१२
गुरु
13

तिसाध्यताज्ञानं न प्रवृत्तिहेतुरपितुरपितु प्रवृत्तिसाध्यताज्ञानं प्रवृत्तिलिंगं च चिकीर्षाधीनं जन्मतावच्छेदकतया सिद्धो जातिविशेष
ः चिंतामणिकारोक्तं कृतसंशे चिकीर्षाधीनत्वविशेषणमपि प्रवृत्तित्वमेवबाध्यं ः अत एवं नातिशयकथमेमप्रवृत्त्यापत्तिवारणार्थं
स्वातंत्र्येण चिंतामणिकारोक्तं पतत्व चाधीनत्वं विशेषणांतरमपि संगच्छमेवेत्याहुः ॥ नन्वेवमपि प्रवृत्तिं प्रतिकृतिसाध्यताज्ञानस्य
तस्मात्रस्य हेतुत्वात् हिंसेपे विषभक्षणादेर्बलवदनिष्टानुबंधित्वज्ञानदशायां प्रवृत्त्यापत्तिर्दुर्वारा ॥ एवं तृप्त्येवषं साधनलाभाय तृज्ञा
नदशायां चैत्यसंवंदनादावपि तथा ततदानीमपि तत्स्वाधीनकृतिसाध्यताज्ञानसंभवात् ः न च विषभक्षणे चैत्यसंवंदनादेः स
स्वाधीनकृतेरसुसस्मात्तत्साध्यत्वाभावात्तज्ज्ञानासंभवेन नोपदर्शितापत्तिरिति वाच्यं ॥ विषभक्षणे चैत्यसंवंदनादेर्बलवदनिष्टा
नानुबंधित्वविशिष्टेष्टसाधनत्वरूपलिंगभ्रमदशायां जायमानानुकृतिसाध्यत्वानुमितिस्तत्तत्कृत्युत्पत्तेरबाधकाभावेन कृतिसा
ध्यत्वस्य तत्रावाधिततया तज्ज्ञानस्यापि तत्र संभवेनोपदर्शितापत्तिसंभवादिति ः न च तत्कालीनकृतिसाध्यताज्ञानादत्र प्र
प्रवृत्त्यापत्तिवारणाय यदानींतनप्रवृत्तिं प्रतीदानींतनकृतिसाध्यताज्ञानस्य हेतुतायां तत्र वर्षपर्यायतया बलवदनिष्टानुबंधित्वा
दिज्ञानदशायां विषभक्षणादेर्न प्रवृत्त्यापत्तिः संभवति ॰ विषभक्षणादेर्बलवदनिष्टानुबंधित्वादिज्ञानदशायामुक्ततेरभावेन तत्त
त्कालीनकृतिसाध्यताभावेन तत्र तत्कालीनकृतिसाध्यत्वज्ञानासंभवादिति वाच्यं ः यतो भ्रमकारणावच्छेदककोटिप्रविष्टमि राम
१२

हीनेतन तत्वपस्मिन्क्षणेप्रवृत्तिर्भविष्यतीति तत्क्षणपर्यंतस्थायित्वस्थूलकालवर्त्तिमुहूर्त्तात्मकस्थूलकालत्वादिकमेव वा
च्यः तथाविधमुहूर्त्तात्मकस्थूलकालसाध्यविषमस्मरणादावुपदर्शितेऽशासाप्रवृत्तिज्ञाने तत्र बलवदनिष्टानुबंधित्वादिज्ञानदशा
त यामबाधितंतथाविधस्थूलकालीनकृतिसाध्यताज्ञानसंभवेन प्रवृत्त्यापत्तिर्दुर्वारैवा अत एव पक्षधरमिश्रा अप्याहुः स
ज्ञातथाधापीदानींतनसेच्छाधीनतापाकृतितत्साध्यं विषमस्मरणादिकमितिज्ञानात्प्रवृत्तितथाविधमू[illegible]हूर्त्तात्मकस्थू
लकालावच्छेदेन इदानींतनस्य तादृशमिश्रग्रंथासंगतिरितिचेदेवं स्वविशेषणावच्छिन्नप्रतिसंधानजन्यकृतिसाध्यताज्ञानस्य प्रवृ
त्तिहेतुत्वेनानुपपत्त्यभावात् अत्र स्वपदं प्रवर्त्तमानपुरुषपरं विशेषणपदं तद्वृत्तिधर्मपरं मतुपः संबंधः तथा च तत्पुरुषावृ
त्तीनीतनप्रवृत्तिप्रतितत्पुरुषवृत्तिधर्मसंबंधज्ञानजन्यदानींतनकृतिसाध्यताज्ञानस्य हेतुत्वमिति पर्यवसन्नं एवं च विषमस्म
त्या रणादेर्बलवदनिष्टानुबंधित्वादिज्ञानदशायां न प्रवृत्त्यापत्तिः तदानीं तन्निरुक्तस्वविशेषणावच्छिन्नप्रतिसंधानजन्यकृतिसा
ध्यताज्ञानस्यासंभवादिति न चेदृशसंभवदुक्तिकं विषमस्मरणादौ बलवदनिष्टानुबंधित्वादिज्ञानदशायामप्ययं पुरुषः कृ
तिसाध्यविषमस्मरणकस्तत्त्वाद्यनुमानादिनिरुक्तस्वविशेषणावच्छिन्नप्रतिसंधानजन्यकृतिसाध्यताज्ञानसंभवादिति
वाच्यं यतोऽत्र प्रवर्त्तमानपुरुषवृत्तिधर्मसंबंधो तेन बलवदनिष्टानुबंधित्वविशिष्टेष्टसाधनत्वशून्यतत्कालजीवित्वादिधर्म

विधि॰नि॰ तरधर्म एवविव क्षणीयः तथात्वकाम्यत्वेनाज्ञायमानार्थगोचरप्रवृत्तिंप्रतिशुचितकालजीवित्वादिलिंगकक्रुतिसाध्यताज्ञा
१४ नंहेतुर्निरस्तेनाज्ञायमानार्थगोचरप्रवृत्तिंप्रतिबलवदनिष्टाननुबंधित्वविशिष्टेष्टसाधनतालिंगकक्रुतिसाध्यताज्ञानंहे
14 तुरित्यर्थः पर्यवसन्नः एवंत्वविषभक्षणादेर्बलवदनिष्टानुबंधित्वादिज्ञानदशायांबलवदनिष्टाननुबंधित्वविशिष्टेष्टसाधन
ताज्ञानासंभवेनतल्लिंगकक्रुतिसाध्यताज्ञानानुत्पत्त्यानतत्रप्रवृत्त्यापत्तिरिति॰ काम्येनित्यत्वभ्रमदशायांशुचितकालजी
वित्वादिप्रतिसंधानजन्यक्रुतिसाध्यताज्ञानादेवप्रवृत्तिः॰ नित्यकाम्यत्वभ्रमदशायांतथाविधेष्टसाधनत्व[redacted]दशायांशु
[redacted]कालजीवित्वादिप्रतिसंधानजन्यक्रुतिसाध्यताज्ञानादेवप्रवृत्तिः॰ नित्यकाम्यत्वभ्रमदशायांतथाविधेष्टसाध[redacted]
नत्वभ्रमजन्यक्रुतिसाध्यताज्ञानादेवप्रवृत्तिरतः काम्यगोचरप्रवृत्तित्वादिकमपहायकाम्यत्वेनाज्ञायमानप्रवृत्तित्वादिकमे
वकार्यतावच्छेदकमत्रवाच्यं॰ अन्यथाव्यभिचारादिति॰ यत्तुतथाविधकार्यकारणभावद्वयकल्पनेपिसामान्यकारणाभा कार्य
वविधयातत्स्वरूपीयप्रवृत्तित्वावच्छिन्नंप्रतितत्स्वरूपवृत्तिधर्मसंबंधज्ञानजन्यक्रुतिसाध्यताज्ञानत्वरूपस्यविशेषणाभावाप्रति
संधानजन्यक्रुतिसाध्यताज्ञानत्वेनहेतुताअवश्यंकल्पनीयायप द्वयोः कार्यकारणभावबाधकंविनातत्सामान्ययो रो
रपीतिन्यायात॰ नैवंदसतियागादेर्बलवदनिष्टाननुबंधित्वविशिष्टेष्टसाधनताज्ञानलिंगकक्रुतिसाध्यताज्ञानकालप्रवृ राम
१४

सन्नुपपत्तिस्तत्रेदानींतनगौरोप्रवर्त्तमानपुरुषे धर्मसंबंधज्ञानाभावेन तस्यैतज्जन्यकृतिसाध्यताज्ञानात्मकसामान्यकारणासं
भवादिति वाच्यं इष्टसाधनत्वस्य विषयतासंबंधेन यत्कामनाविशिष्टं तत्साधनत्वरूपतया तदानीमपि प्रवर्त्तमानपुरुषवृत्तिका
मनारूपधर्मस्य स्वविषयसाधनतात्मकपरंपरासंबंधज्ञानस्य तथाविधकामनाया विषयतारूपसंबंधज्ञानस्य चापेक्षितत्वे तथा
स तथाविधसामान्यकारणत्वेनानुपपत्त्यभावादिति तन्मतं तथाविधनियमे मानाभावात् प्रवृत्तित्वावच्छिन्नं प्रतितत्त्वेन
हेतुताकल्पनेनैव सामान्यकार्यकारणभावनिर्वाहे उपदर्शितरीत्या सामान्यकार्यकारणभावकल्पनाया अनावश्यकत्वात् किंच
यत्र बहुतरप्रतिबंधकदर्शनेष्टानुबंधित्वविशिष्टेष्टसाधनताविषयककृतिसाध्यताज्ञानं तत्र तथाविधेष्टसाधनताज्ञा
नजन्यकृतिसाध्यताज्ञानत्वस्य जन्यतावच्छेदकत्वेन गुरुतया कारणतावच्छेदकत्वेन लघुशरीरस्य तथाविधेष्टसाधनताकृतिसा विषयक
ध्यताज्ञानत्वस्यैव प्रवृत्तिजनकतावच्छेदकत्वमुचितं । एवं च प्रवृत्तिं प्रतीष्टसाधनताज्ञानस्यापि हेतुतया कथं कृतिसाध्यता
ज्ञानमेव तत्र हेतुरिति गुरुमतं एवं कृतिमिति चेन्न कृतिसाध्यताफलोपधायकत्वरूपकालांतरभावीष्टसाधनत्वयोरवच्छेदकत्वं
देनावगम्यमानतया विरुद्धयोरेकज्ञाने एकधर्म्यंशे प्रकारत्वासंभवेन तथाविधोभयविषयकज्ञानाप्रसिद्ध्या न लघुनापि रूपे
णा प्रवृत्तिहेतुत्वमपि तत्त्वथानुपपत्त्या गुरुणापि तथाविधेष्टसाधनताज्ञानजन्यकृतिसाध्यताज्ञानत्वेन तथैव तेनानुपप

न३

विधिःनि: त्तिगंधोपि नन्वित्थं तत्रैव संभवति यत्र कृतिसाध्यत्वफलोपधायकत्वरूपकालांतरभावीष्टसाधनत्वयोरेकत्रैकावच्छेदेन वि

२५ रूपत्वं तत्रैव नास्तीति [redacted] चेत्तदेव हि कृतिसाध्यत्वं हि कृत्यधीनसमयसंबंधित्वं तच्च पाकादावुत्पत्तिकालावच्छेदेनैव

15 घ निष्पत्तिश्चा [redacted] स्मरणा संबंधस्यैव कृत्यधीनत्वात् पाकादेः कृत्यधीनसमयसंबंधाभावात् फलोपधायकत्वरूपका

लांतरभावीष्टसाधनत्वं तु पाकादेः कृत्यधीनसमयसंबंधध्वंसाधिकरणकालावच्छेदेनैव संभवति तस्मिन्कालावच्छेदेन

फलोपधायकत्वरूपकालांतरभावीष्टसाधनत्वाभावात् एवं चैकत्र भिन्नकालावच्छेदेन वर्त्तमानयोस्तथाविधसा

ध्यत्वतथाविधसाधनत्वयोरेककालावच्छेदेनावर्त्तमानत्वरूपो विरोधः स्पष्ट एवेति [redacted] स्त्वेतादृशविरोधस्यापा[redacted]

[redacted]साध्यत्वतथाविधसाधनत्वयोरेककालावच्छेदेनावर्त्तमानत्वरूपो विरोधः स्पष्ट [redacted] नन्वस्त्वेतादृशविरोधस्त

व थापि तदुभयविषयकमेकं ज्ञानं न संभवतीत्युक्तमयुक्तं एकत्र भूतलादौ घटपटाद्युभयसमूहालंबनवत् एक

त्र पाकादौ तथाविधकृतिसाध्यत्वतथाविधेष्टसाधनत्वयोः समूहालंबने बाधकाभावादिति चेन्न उपदर्शितविरोध

विशिष्टयोर्धर्म्मयोरेकज्ञाने स्वत्वावच्छेदकविशिष्टधर्मिणि भाननियमेन एकज्ञाने स्वत्वावच्छेदकविशिष्टकृतिसाध्यता

वच्छेद[redacted]ककृत्यधीनसमयसंबंधध्वंसाभावाधिकरणसमयात्मकासिद्धौ तादृशधर्मिणि इष्टसाधनतावच्छेदककृत्यधीनस राम

२ कविशिष्टधर्मिणि तदुभयभानासंभवात् स्वत्वावच्छेदकविशिष्टधर्मिणि तदुभयभाने तु न संभवति। उपद २

मयसंबंधध्वंसाधिकरणसमयरूपसिद्धत्वयोरेकत्रज्ञानासंभवान्न तथाविधासिद्धत्वज्ञानं तथाविधसिद्धत्वज्ञानयोःका
येकालवृत्तित्वयोः परस्परमप्रतिबध्यप्रतिबंधकभावात् अत एव विधिवादे चिंतामणिकारोपि न तथाविधसाध्यत्व तथावि
धसाधनत्वयोरेककालावच्छेदेनैकत्रावर्त्तमानत्वरूपं विरोधमनुसाध्य न तथा च पाकादेरसिद्धासिद्धत्वज्ञानमेवसाधन
त्वग्रहः नैवंकदाचिन्न सिद्धमसिद्धमेवेति तत्रापत्तेः साध्यत्वे तत्वत एवोक्तत्वान्नितिमिश्राः स्तुकृतिसाध्यत्वेष्टसाधनत्वयोर्मिथो
विरोधमन्यथानुसाधयंतितथाहिकृतिसाध्यत्वं कृतस्वरूपभविष्यत्वं न तु पुनः कृतिनिष्ठाम्यथा सिद्धानिरूपकत्वे सति प्रति
योगितासंबंधेन कृतिकालीनप्रागभावत्वं सपाकोत्पत्तिप्रागभावकालावच्छेदेन वर्त्तमानं इष्टसाधनत्वं तु अनन्यथा
सिद्धत्वनियतपूर्वकालसंबंधत्वं घटितं पाकाधिकरणकालध्वंसाधिकरणीभूतकालरूपसिद्धावच्छेदेन वर्त्तमानमिति त
दुभयोरेकत्र एककालावच्छिन्नावर्त्तमानत्वविरोधः स्फुटएवेति न च पाकोत्पत्तिप्रागभावकालः कथमुपदर्शितकृति
कालीनप्रागभावत्वरूपकृतिसाध्यत्वस्यावच्छेदकस्तेनोक्तं तथाविधकृतिसाध्यत्वरूपावच्छेद्याधिकरणभूत
कपाकोत्पत्तिप्रागभावाधिकरणकालस्य संबंधतया तस्यावच्छेदकत्वासंभवात् अवच्छेद्याधिकरणसंबद्ध
स्यैवावच्छेदकत्वनियमात् इति वाच्यं अवच्छेदकस्यावच्छेद्यस्थलत्वात् यत्र धर्मसंबद्धकालसंबद्धमवच्छेद्यं तत्रा

विधिवि वच्छेदाधिकरणधर्मिसंबन्धमपि अवच्छेदकं पश्चात् अनागतयागसंबंधः कालसंबंधिज्ञानस्यावच्छेदकं एकतत्कालसंबंध
१६ वत्वं यत्र तु धर्मिसंबन्धकालसंबंधमवच्छेदकं तज्ज्ञानावच्छेद्यां निकारणतानादृशाकृतिसाध्यत्वेष्टसाधनत्वयोर्विरोधमुत्पाद्यनन्येवा
16 कारीसाकृतिसाध्यताविषयकेष्टसाधनताज्ञानासंभवसंपादकत्वेन प्रकृते ॰ धिकरणधर्मिसंबन्धमेवावच्छेदकमि
त्यभ्युपगमेनानुपपत्त्यभावादिति तन्न गुरुमतेप्यादृशकृतिसाध्यत्वप्रकारकं ज्ञानं + पयोगिनमामिश्चा [redacted] क ग्रद ७
रीसात्तयोर्विरोधमुत्पाद्यनस्य प्रकृतानुपयोगितायादृशं तु कृतिसाध्यत्वं मिश्रैर्व्याकृतरूपं गुरुमते न तत्प्रकारकज्ञान
स्यैव प्रवृत्तिहेतुत्वात् अन्यथा नकलंजंभक्षयेदित्यादि निषेधापूर्वजनकैककलंजभक्षणप्रागभावप्रवृत्तेरनुदयापत्तेः
त प्रतियोगितासंबंधेन तथाविधप्रागभाववत्त्वरूपं तत्कृतिसाध्यत्वेन तस्य प्रागभावे ॰ मत्त्वेन कलंजभक्षणप्रागभावे त
त्प्रकारकज्ञानासंभवादिति न किंचिदेतत् तस्मात् पूर्वोक्तकारीसाकृतिसाध्यत्वेष्टसाधनत्वयोर्विरोधमुत्पा
द्यनमेव प्रकृतोपयोगितया सम्यगिति यदि च पूर्वोक्तकारीसाकृतिसाध्यत्वेष्टसाधनत्वयोर्विरोधोपि न तदृशोभय
विषयकज्ञानमसंभवि स्वस्वावच्छेदकविशिष्टधर्मिरोपविरुद्धधर्मद्वयविषयकज्ञानमुत्पद्यते द्वयेनियमेमा गाम
नाभावादवच्छेदकाविषयतयैव तथाविधविरुद्धधर्मद्वयविषयकज्ञानस्य संभवादिति विभाव्यते तथा इष्टसाधनता १६

विषयककृतिसाध्यताज्ञानं न प्रवृत्तिहेतुः सिद्धे धर्मे साधनत्वस्य इष्टाविरोधिज्ञानविषयसिद्धत्वव्याप्यतयाविरोधि
व्याप्यत्वाज्ञानविधया इष्टसाधनताविषयककृतिसाध्यताज्ञानस्येष्टाविरोधित्वेन चिकीर्षाया अजनकतया चि
कीर्षाद्वारा प्रवृत्तिजनकत्वसंभवात् न चैवं सति गुरुमते एवं कथमिष्टसाधनताज्ञानजन्यकृतिसाध्यताचिकीर्षा
पि द्वारा प्रवृत्तिप्रति हेतुः तदानीमिष्टे उपदर्शितरीत्या चिकीर्षाप्रतिबंधकीभूतस्येष्टसाधनताज्ञानस्य सत्वेन चिकीर्षा
याः उत्पादासंभवादिति वाच्यं बिनस्यैरवस्येष्टसाधनताज्ञानजन्यकृतिसाध्यताज्ञानस्य तथात्वेनानुपपत्तेस्सुधा
वादिति केचित्तु सुखदुःखाभावतदुपाय इष्टसुखज्ञानदुःखाभावज्ञानबलवदनिष्टाननुबंधीष्टसाधनताज्ञाने
ष्विष्टपताख्यातिरिक्तधर्मस्य साधनेष्टसवरुपमभ्युपेयं अन्यथा इष्टात्वरूपानुगतधर्मस्य कस्यचित्कार्यतावच्छे
दकत्वासंभवेनानुगतधर्मस्यानुगतकारणतावच्छेदकनियमभंगप्रसंगः पाधिधातिरिक्तधर्मांगीकारे तु तत्त
तस्यैवेष्टात्वावच्छिन्नं प्रतिहेतुत्वासंभवेनोपदर्शितनियमभंग इति एवं च कृतिसाध्यताज्ञानवत् उद्देश्यत्व
ज्ञानमपि चिकीर्षाद्वारा प्रवृत्तिहेतुरित्याहुः तन्मते उद्देश्यत्वज्ञानं विनापि सुखज्ञानमात्रादिच्छोत्पत्तेः अभि
चारात् इष्टात्वावच्छिन्नं प्रत्युद्देश्यत्वज्ञानस्य हेतुत्वासंभवात् वस्तुतस्तु अनुगतधर्मस्यानुगतकारणताकार्य

विधिःनि
१० कृ
17

तावच्छेदकत्वमिति निष्पन्नानुरोधेनोद्देश्यतावातिरि क्तपदार्थानामुपेयः इच्छात्वावच्छिन्नं प्रति आत्मत्वेन हेतुत्वक-
ल्पनयापि तादृशनियमोपपत्तेः एवं च प्रवृत्तिं प्रति उद्देश्यतज्ज्ञानस्य हेतुत्वकल्पनमसंभवदुक्तिकृतानुयाद एवमे
वेति सारं अथेदानींतनमत्कृतिसाध्यत्वस्य साध्यत्वविशिष्टेष्टसाधनताज्ञानजन्मकृतिसाध्यताज्ञानस्याप्रसिध्यात
त्र प्राक्तनज्ञानस्य तदभिधानमसंगतमेवेति चेन्न पाकः स्वेच्छाधीनेदानींतनमत्कृतिसाध्य इच्छाधीनेदानींतनमत्कृति
व्यतिरेकप्रयुक्तव्यतिरेकप्रतियोगित्वे सति बलवदनिष्टाननुबंधित्वविशिष्टेदानींतनमदिच्छाधीनत्वसाधनताद्यनु विषय
मानादेव पाकादौ तथाविधेदानींतनमत्कृतिसाध्यताज्ञानसंभवेनानुपपत्त्यभावात् न चात्र विशिष्यसाध्यते
पाद्याप्रसिध्या विशिष्यव्याप्तिज्ञानासंभवात्तेनैवमितिवाच्यम् विशिष्य तथाविधव्याप्तिज्ञानासंभवेपि यदिच्छा
धीनयत्कालीनयत्पुरुषीयकृतिव्यतिरेकप्रयुक्तव्यतिरेकप्रतियोगित्वे सति बलवदनिष्टाननुबंधित्ववि
शिष्टयत्पुरुषीययत्कालीनेच्छाविषयसाधनानां स्वेच्छाधीनतत्कालीनतत्पुरुषीयकृतिसाध्यमिति पर्यवसित द्व
सामान्यव्याप्तिज्ञानेनैव तथानुमितिसंभवादिति अत्र हेतोरिष्टसाधनत्वांशाविशेषभोजनजन्यफलेच्छा राम
धीनकृतिजातीयकभोजनेस्वेच्छाधीनत्वघटिततथाविधसाध्याभाववति व्यभिचार इति तद्वारणार्थं तत्तत्क्रि १०

वेशनं एवमत्र बलवदनिष्टाननुबंधित्वांशानिवेशे विषमस्पर्शे इष्टसाधनत्वनाहिते न तथाविधफलेच्छावता कृतेनानरोपकवि
१८ षमस्पर्शे स्वेच्छाधीनत्वघटितनथाविधसाध्याभाववत्यव्यभिचार इति तद्वारणाय तत्र तन्निवेशनं बलवदनिष्टाननुबंधित
18 बलवद्द्वेषविषयाजनकत्वं द्वेषे बलवत्त्वं च जातिविशेष इति न च साध्यतावच्छेदककोटौ कृतिसंशे इच्छाधीनत्वनिवेश एवापद
र्शितसाव्यभिचारवारणार्थं हेतौ तयोरुपादानमावश्यकं तदेव न साध्यतावच्छेदककोटौ कृतिसंशे इच्छाधीनत्वनिवेशप्र
योजनाभावादिति वाच्यं यतो बलवदनिष्टाननुबंधित्वविशिष्टेष्टसाधनत्वस्य सार्थक्याय साध्ये कृतिसंशे स्वेच्छाधीनत्वनि
वेशस्यावश्यकत्वात् तत्पदेनात्र हेत्वधिकरणमेवोपादेयं यत्तु अत्र साध्ये कृतिसंशे इच्छाधीनत्वानिवेशे मन्मते प्रवृत्तसा
नादृशज्ञानजन्यकृतिसाध्यताज्ञानरूपप्रवर्त्तकज्ञानसंपत्त्यर्थं हेतावावश्यं निवेशनीयं बलवदनिष्टाननुबंधित्व
विशिष्टेष्टसाधनः ॥

एम
१८

॥